## श्रीमद्विश्वप्रियप्रबन्धे द्वितीयो विलासः

यथा धर्मसुतो राजा राजसूये महाक्रतौ ।
कृष्णं संपूजयामास तथायं मुनिपुङ्गवः ।। 1

द्रव्याणि दत्त्वा विद्वद्भ्यः सदा श्रीकृष्णमन्दिरे ।
सर्वमूलग्रन्थरत्नपारयणमकारयत् ।। 2

सर्वातिशायिनीं पूजां त्रयीपारायणं तथा ।
दृष्ट्वा सच्छास्त्रपाठं च नेच्छन्मुक्तिं जना भुवि ।। 3

तदा कर्नाटकाधीशः कृष्णराज[1] इति श्रुतः ।
युतोऽमात्यैः कतिपयैः सेनया चतुरङ्गया ।। 4

गुरुशेखरपर्याये कृष्णं द्रष्टुं समभ्यगात् ।
तदा समाजः सुमहानभूत् श्रीकृष्णमन्दिरे ।। 5

अन्येषां यतिवर्याणां काश्मीराम्बरधारिणाम् ।
सभायां राजसिंहस्य कौपीनवरभूषणः ।। 6

यतिराट् शुशुभे तत्र न्यासिनां भूषणं हि तत् ।
राजस्त्रियः सुन्दराङ्गं कृष्णं दृष्ट्वातिभक्तितः ।। 7

हारान् मुक्त्वा मणियुतान् भूषणानि च सर्वशः ।
उन्मुच्य निदधुः कृष्णसन्निधौ, यतिशेखरः ।। 8

1. Maharaja of Mysore (Sri Krishnaraja Odeyar).



तानि सर्वाण्युपादाय कृष्णराजं बहिर्गतम् ।
उपासर्पत यत्स्त्रीणां स्वातंत्र्यं शास्त्रनिन्दितम् ।। 9

स राजशेखरो हृष्टः स्वीयं हारं महाधनम् ।
उन्मुच्य प्रददौ सद्यो वदान्यः कः परस्ततः ।। 10

तैर्भूषणैरलंचक्रे गुरुर्यादवनन्दनम् ।
गुणपूर्णं सुराग्रण्यं सर्वभूषण भूषणम् ।। 11

विभूषितं हरिं दृष्ट्वा राजा पूर्णमनोरथः ।
गुरुं रहः समानीय प्रोचे स जगतीपतिः ।। 12

ब्रवीतु देशिकोत्तंसः का सेवा कृष्णतुष्टिदा ।
इति पृष्टो गुरुः प्राह स्वन्नदानं हरेःप्रियम् ।। 13

नित्यं कुर्वन्नदानस्य साहाय्यमिति चोदितः ।
स्वसंस्थानात् कृष्णपूजावृत्तिमाज्ञापयत् प्रभुः ।। 14

तत्क्लृप्तवृत्या कृष्णस्य पूजाद्यापि निराकुला ।
एवं राजाधिराजस्य बहुमानं गुरौ परम् ।। 15

वैभवं वीक्ष्य दुष्टानां हृद्यसूयांङ्कुरोऽजनि ।
तेन दोषेण वणिजो निरुद्धा बाणकर्मणि ।। 16

रथोत्सवस्य समये[2] श्रुत्वा स यतिपुङ्गवः ।
सांयात्रिकान् समानीय कर्पूरनिचयं गुरुः ।। 17

2. The car festival is even now celebrated with colourful fireworks in the Car street at Udupi.

बहुसाहस्ररूप्याप्यं आर्पयत् पुरतो हरेः ।
तत्काले पिशुनाः केचित् सुब्रह्मण्ययतीश्वरम् ॥ 18

प्राबोधयन्मध्वाटव्यासदेवः प्रगृह्यताम् ।
सोदामठीयैः श्रीकृष्णपूजा नो दीयते खलु ॥ 19

श्रीविष्णुतीर्थवंशीया यूयं तेऽपि तथाविधाः ।
इति प्रेरितकर्मन्दिकिंवदन्तीं तथाविधाम् ॥ 20

श्रुत्वा गुरुः व्यासदेवं पर्याये समतोषयत् ।
पूजामन्त्रजपैस्तुष्टो मध्वनाथः त्रयीपतिः ॥ 21

समाप्य यतिशेखरो यदुपतेर्महं सादरं
सुधाशनसमर्पितं हरिपदाब्जभृंगः सुधीः ।
सुमध्वमुनिसेवितं महितमध्यवाट[3]स्थितं
जगाम हरिमर्चितुं पुरुटसंपुटान्तर्गतम् ॥ 22

सुमठमधिवसन् गुरुप्रबर्हः स्तुतिनतिमन्त्रजपैः प्रसाद्य देवम् ।
गुरुरथ परिगृह्य गन्तुमैच्छत् सपदि सुधाधवलो बभूव देवः ॥ 23

जम्बूफलसमानाभं हरिं धवलतां गतम् ।
संजातशङ्को यतिराड् निदध्यौ किमभूदिदम् ॥ 24

इति तूष्णीं व्यासदेवं स जनान् समदर्शयत् ।
तत्राशीतिवयोवृद्धो दृष्ट्वा देवं तथाविधम् ॥ 25

---

3. Madhyavāṭa – Naḍḍantāḍi Matha.





ननर्त सुसमुन्नद्धहर्षात् विकसिताननः ।
जगाद गुरुणा पृष्टः प्रसादसमये पुरा ॥ 26

एवंविधो हरिः दृष्टः श्रीमद्भाग्यं तु किं ब्रुवे ।
एवं प्रसादविज्ञातहरिभावो हरिप्रियः ॥ 27

मध्ये संस्थाप्य वेदेशं तुरगास्यवराहयोः ।
पूजां नवविधां चक्रे पायसादीन् समर्पयन् ॥ 28

जगाम तीर्थयात्रार्थं मध्ये मार्गं च हंसराट् ।
सत्यधर्म[4] इति ख्यातो वादिराड्भक्तिपूरितः ॥ 29

गुरुं स्वमठमानाय्य व्यासपूजामकारयत् ।
महिशूरपुरं प्राप्य राज्ञा संपूजितोऽभवत् ॥ 30

ततो बलमुरिग्रामे द्वादश्यां सह्यजाप्लुतः ।
संपूज्य देवं पीठस्थः तीर्थं दातुं प्रचक्रमे ।
तदा रामाचार्यनामा स्नातो नद्यां ददर्श हि ॥ 31

मार्तण्डमण्डलद्वन्द्वं तदा स गुरुपुङ्गवः ।
तमामीय च पप्रच्छ किं दृष्टं सह्यजातटे ॥ 32

इति सोऽपि यथाचष्टे उक्त्वोच्चैर्गुरुमब्रवीत् ।
किं त्वं पीठं समध्यास्से पश्य तेजोमयं गुरुम् ॥ 33

इत्युक्तः सहसाऽपश्यत् पश्चाद्भागे तथाविधम् ।
ज्ञात्वा श्रीवादिराजस्य सान्निध्यं पीठमत्यजत् ॥ 34

---

4. Head of the Uttarādi Mutt (1797-1830).

ततः प्रभृति योगीन्द्रो भूमावुपविवेश ह ।
ततो षट्टादवतरन् शिरोचलमुपागमत् ।। 35

ग्रन्थलेखनकाले तु बुभुक्षुं रामनामकम् ।
कदलीफलोच्चयं दत्वा भक्षयेत्याह योगिराट् ।।
सन्निधानं विहाय अद्मीत्युक्त्वाऽन्यत्र गतो द्विजः ।। 36

सर्वत्र स गुरुं दृष्ट्वा पुनः सन्निधिमागतः ।
कथं भुञ्जे यतिवर दृश्यसे त्वं हि सर्वतः ।। 37

इत्यब्रवीत्तर्ह्यत्रैव स्थित्वा भुङ्क्ष्वेति चोदितः ।
सविस्मयः तथा चक्रे किं चित्रं हरिकिङ्करे ।।
ततोऽवरुह्य गुरुराड् गज्जलदीं उपागमत् ।। 38

तत्र मायानदीतीरे संगृह्य हरिपेटिकाम् ।
उपाविशद् घोररूपा रजनी चाभवत्तदा ।। 39

तत्र सत्राधिपो विप्रः तर्कनिष्ठोऽपि कश्चन ।
विज्ञापयामासतुःतौ नेह स्थेयं मुनीश्वर ।। 40

द्वीपिभल्लूकनिबिडं इत्युक्तः प्राह तौ मुनिः ।
भवन्तौ गच्छतां शीघ्रमागमिष्ये जपन्नहम् ।। 41

तदा तौ किंचिदागत्य श्रितौ कंचिन्महाद्रुमम् ।
यामरात्रौ व्यतीतायां क्ष्माभृच्छिखरदेशतः ।। 42

सुमहान् ददृशे दीपः तत्पश्चात् पादुकापदः ।
समागच्छत् हंसवर्यः तेजोराशिरिव ज्वलन् ।। 43





स्वसन्निधिं समायान्तं दृष्ट्वा स मुनिपुङ्गवः ।
साष्टाङ्गं प्रणनामासौ भक्तिनम्रशिरोधरः ।
गैर्वाण्या भाषया चोभौ संवादं बहु चक्रतुः ।। 44

दृष्ट्वा चात्यद्भुतं रूपं श्रुत्वा संवादमद्भुतम् ।
आश्चर्यपूरजठरे तौ विप्रौ निममज्जतुः ।। 45

एवं चित्रचरित्रोऽसौ मुनिरन्नविवर्जितः ।
लाजभक्षः पादचारी भूशायी व्रतिपुङ्गवः ।। 46

सेतौ स्नात्वा रङ्गनाथं दृष्ट्वा वेङ्कटग हरिम् ।
क्रमेण सञ्चरन्योगी श्रीमत्सोदापुरीमगात् ।। 47

त्रिविक्रमरथोत्सवं बहुजनान्नदानैः समं
सुधूपवरदीपकैः परिसमाप्य योगीश्वरः ।
हयाननमहोदधाववभृथं नवं कारयन
बभूव मुनिपुंङ्गवो हरिकृपाकटाक्षेक्षितः ।। 48

इति श्रीमद्विश्वप्रियविलासप्रबन्धे द्वितीयो विलासः
समाप्तः ।

## श्रीमद्विश्वप्रियप्रबन्धे तृतीयो विलासः

तीर्थपल्लीमठे तिष्ठन् भुवनेन्द्रयतीश्वरः ।
ब्राह्मणाराधनं चक्रे गुरुपुण्यदिने किल ॥ 1

ब्राह्मणेषु निमज्जत्सु तुङ्गभद्रानदी जले ।
तत्र कश्चन विप्रेन्द्रो नदीमध्यशिलातले ॥ 2

दृष्ट्वा विश्वप्रियगुरुं प्रणनामाति भक्तितः ।
संघे संघे द्विजेन्द्राणां किंवदन्ती तदाभवत् ॥ 3

धन्यो विश्वप्रियगुरुः अत्रागत्याद्य तिष्ठति ।
इति श्रुत्वा भुवनराट् प्रेषयामास किङ्करान् ॥ 4

तदा सोदामठं प्राप्य तत्रत्यान् प्रविचार्य ते ।
सोदापुरस्थं विज्ञाय विश्वप्रियगुरुं पुनः ॥ 5

अवदन् गुरो सोऽपि निमग्नो विस्मयाम्बुधौ ।
कदाचित् भुवनेन्द्रस्य गुरोः पार्श्वमुपागमत् ॥ 6

यतीन्द्रोऽसौ तदा तत्र कृष्णाचार्यं इति श्रुतः ।
हरपनल्ली ग्रामवासी गुरुपादमधिक्षिपन् ॥ 7

अशृण्वन् तत्प्रोक्तमर्थं उद्घोषमकरोद्द्विजः ।
श्रुत्वोच्यतामिति गुरुः भ्रुकुटीकुटिलाननः ॥ 8

स्तम्भयामास तत्कालात् वाग्धाटीरहितोऽभवत् ।
तदा कोच्चीमहीपालो विद्वद्राजशिरोमणिः ॥ 9





वादिमत्तेभपंचास्यो ग्रन्थकृत् भगवत्प्रियः ।
स्वरूपसुखभोगेतु यदा सन्दिग्धमानसः । 10

पूर्णवेदपतिः स्वप्ने नर्तनं कुर्वति प्रभुम् ।
प्रोवाच, नृत्तसमये परमानन्दनिर्भरः ॥ 11

अनुभूतस्तदा राज्ञा राजा संछिन्न संशयः ।
राज्ञा संप्रार्थितः तेन तं देशमगमद् गुरुः ॥ 12

स राजा गुरुराजं तं विद्वद्राजशिरोमणिः ।
भक्त्या संपूजयामास यादवेशं विदेहवत् ॥ 13

सच्छास्त्रस्थापकं भूपं विष्णुदीक्षा प्रवर्तकम् ।
वीक्ष्यानुगृह्णन् शिष्येण मुदमाप यतीश्वरः ॥ 14

क्ष्मापतेः सहवासेन जनास्तद्देशवासिनः ।
भगवद्भक्ति भरिताः सत्संङ्गो मुक्तिपद्धतिः ॥ 15

तद्राजवर्यपूजायै भगवत्प्रतिमां ददौ ।
संस्थानपूजासदृशी पूजारब्धा नृपालये ॥ 16

पूर्णत्रयीमठे तत्र तुरङ्गवदनं हरिम् ।
संस्थाप्य प्रययौ द्रष्टुं वादिराजं जगद्गुरुम् ॥ 17

अण्णय्याचार्यवर्यस्य बहुकालादपुत्रिणः ।
पुत्रो बभूव तच्चित्रं गुरुवर्यं प्रसादतः ॥ 18

आख्यान प्रोक्तसल्लिङ्गैः व्यासानयनपूर्वकैः ।
निरन्नत्वव्रतमुखैरयं वृन्दावनार्यकः ॥ 19

इति व्यजानन् आमोदो मृगनाभेरवारण: ।
तदा ज्ञानवयोवृद्ध: महीपालविकर्तन: ।। 20

निष्क्रम्य ब्रह्मरन्ध्रेण विष्णो: पादमुपेयिवान् ।
तदनन्तरजो राजा रामवर्मेति विश्रुत: ।। 21

गुरुसंदर्शनाकांक्षी प्रेषयामास किङ्करान् ।
आजगाम स योगीन्द्रो वत्सं गौरिव वत्सला ।। 22

पथि देवालयं प्राप्य ग्रामे कुक्कुटपञ्जरे ।
बहिष्कृतो यदा राज्ञा तदा झञ्झानिलो महान् ।। 23

प्रादुर्भूतो देवगृहप्रासादाश्वत्थपादपान् ।
उन्मूल्य प्राक्षिपत् तोये तटाके वीक्ष्य तं नृप: ।। 24

योगीन्द्रं पूजयामास मग्नो विस्मयवारिधौ ।
एवं विचित्र चारित्रो मुनी राजानमभ्यगात् ।। 25

स राजा सेनया भक्ति भरितो भरतो यथा ।
प्रत्युज्जगाम विभवै: छत्रचामर पूर्वकै: ।। 26

समानीय गुरुं राजा मठे समुपवेशयत् ।
कंचित्कालमथावात्सीत् शिष्यस्नेहवशो गुरु: ।। 27

नालिकेर सहस्रेण क्लृप्ते व्यासाभिषेचने ।
पूर्वरात्रे रामनाम्न: स्वप्ने कश्चित् जगाद ह ।। 28

श्वोभूने व्यासदेवस्य जटा संदृश्यते ध्रुवम् ।
प्रातरूचे स विप्रेन्द्र: तथा स गुरुसन्निधौ ।। 29



अभिषेके संप्रवृत्ते तथा राज्ञि समागते ।
जम्बूफलनिभे व्यासे धवला समदृश्यत ।। 30

रेखा कर्पूरसदृशी तां दृष्ट्वा मुमुदुर्जना: ।
अदृष्टपूर्वा सा रेखा दृष्टा तस्मिन्दिने जनै:
ईदृशो व्यासदेवस्य प्रसादो गुरुपुङ्गवे ।। 31

दानवारिजनालभ्य: किमु मानुषदेहिभि: ।
कृष्णराजसमाहूतो महीशूरपुरं गुरु: ।। 32

गत्वोवासार्चितो राज्ञा व्यासाराधनतत्पर: ।
तत: श्रीकृष्णदेवस्य पर्याये समुपस्थिते ।। 33

कृष्णव्यास समायोगमसहन्तो मठाधिपा: ।
मिलित्वा लौकिकास्थाने व्यवहारमकुर्वत ।। 34

कृष्णराजं समामन्त्र्य भक्त्या तेन प्रपूजित: ।
तन्निसृष्टेन सैन्येन सहागाद्रजतासनम् ।। 35

विचार्य हूणाधिपति: व्यासकृष्णसमागमे ।
न विरोध इति ह्याह पर्याय: समजृम्भत ।। 36

यादवेशनिगमेश मेलने देवदुन्दुभिगणा विनेदिरे ।
नर्तनं विदधुरप्सरोगणा: तुष्टुवु: मुनिगणा महोत्सवम् ।। 37

इति श्रीमद्विश्वप्रियविलासप्रबन्धे तृतीयो विलास:
समाप्त:

## श्रीमद्विश्वप्रियप्रबन्धे चतुर्थो विलासः

वासवीसुतसमर्पितं परं कल्किदोरमुखमत्र कश्चन ।
प्रेषितं गुरुवरेण दूषयन् प्राक्षिपत् भुवि यतिः प्रकोपितः ।। 1

तेन दोषनिवहेन चक्षुषः स्थानमत्यजदमुष्य विश्वकः ।
स्वाप्नपद्यगुरुराजवाक्य सन्मानतापि किल सिद्धतामगात् ।। 2

शिष्यभूसुरवरेण कारयन्नग्निहोत्रमुखरेष्टि सन्ततीः ।
कालदोषमथ चिन्तयन् सुधीः तस्य चाश्रमवरं ददावथ ।। 3

विष्णुतीर्थमुनिवंशजस्य तद्युक्तमेव सुखभुक्त्यनन्तरम् ।
अच्युत प्रमितिवंशसिन्धुसच्चन्द्रमा हि रघुवीरनामकः ।। 4

आययौ गुरुवरस्य सन्निधिं मध्वतन्त्रपरमार्थलिप्सया ।
शुद्धबुद्धिमथवीक्ष्य तं मुनिं पाठयन्मुदमवाप योगिराट् ।। 5

श्रीवराहमुनिभृंगवरेण स्वीयदिव्यसुमनोऽनुगामिना ।
व्यासदेवतुरगास्यपूजनं कारयन् परितुतोष धीरधीः ।। 6

तेन साकमथ संदिदृक्षया वादिराजचरणारविन्दयोः ।
भीमसेतुमठगेन वर्त्मनाप्याययौ स गुरुराट्पुरं मुनिः ।। 7

तत्र संवसति मौनिपुंगवे कोऽपि तार्किकशिखामणिर्द्विजः ।
सौख्यतीर्थवर शास्त्रविचारे कोपितो बहिरगात् प्रविनिन्दन् ।। 8

मौनिवर्यगुरुनिन्दकमारादागतं परिसरे धवलायाः ।
सन्निपात्य वरपाथसि दन्ती भूतनाथगुरुराट् प्रबभञ्ज ।। 9





कोऽपि तत्र धनिकः समुपागात् वारितोऽपि स बबन्ध तुरङ्गम् ।
भूतनाथमथ चम्पकवृक्षे सोऽश्वराडभवदद्रिशिखायाम् ।। 10

प्रातरेत्य गुरुवर्यनियोगात् सानुसीम्नि तुरगं समवाप्य ।
विस्मितः स जनतायुतो धनी नालिकेरफलभारमार्पयत् ।। 11

वादिराजगुरुभक्तजनौघः संबभूव मिलितो गुरुपार्श्वे ।
मोदतीर्थगुरुशास्त्रज सारं पातुमेव गुरुवर्यमुखाब्जात् ।। 12

पूर्वपक्षनिवहान् प्रखण्डयत्यत्र मायिरचितान् विनोदतः ।
मेनिरे गुरुवरे सुसन्निधिं वादिराजमुनिपस्य सज्जनाः ।। 13

पूजयत्यतितरां गुरुवर्ये माधवं कुसुमराशिभिरत्र ।
प्रार्थनाक्षणगलत्कुसुमं तत्प्रार्थकाय स ददौ तदद्भुतम् ।। 14

दूरदेशगतभक्तजनौघानुद्धरन् हरिकथाप्रसंगतः ।
पेटिकां शिरसि धारयन् कृशोऽप्याययौ स हरिभक्तितुन्दिलः ।। 15

तत्र तत्र सुजनाननुगृह्णन् उत्तरां गुरुरगात्स सह्यजाम् ।
वेदगर्भकुलमण्डनभूतः शिष्यसंघयुत एत्य ननाम ।। 16

सेतुमाधव इतीड्यसुनामा मौनिराजमनुवर्णिततत्त्वम् ।
देववर्यसदृशं स विदित्वा मध्वशास्त्रमखिलं प्रपपाठ ।। 17

तत्र निर्मलतमे गुरुवर्यो रामदूतमथ भाविसमीरम् ।
ग्रामवर्य उपवेश्य सपर्यां वृत्तिमत्र स जनैरकारयत् ।। 18

तत्र भक्तनिवहेष्वथकश्चित् मातृकापठनशक्तिविहीनः ।
भाष्यमेतदमुतः स च शृण्वन् संबभूव पठने पटुतावान् ।। 19

योगिवर्यगुरुमंत्रितरूप्यं भक्ति पूरितमनाः प्रपूजयन् ।
हर्यनुग्रहवशाद्गुणतोऽसौ पर्यमोचि धनिकेन च केन ।। 20

तत्र तत्र सुजनाननुगृण्हन् मौक्तिकं पुरमगात्स धीरधीः ।
मौनिवर्यमहिमाऽसहिष्णवः केऽपि तत्र सुविरोधमाचरन् ।। 21

ग्रन्थकर्षणमुखान् मुखभङ्गान् नन्दितीर्थमुनिशेखरकाले ।
चक्रुरेव कुजनाः खलु तेषां संभवेन्निजगतिर्हिनान्यथा ।। 22

एवमेव कुजनाः स्वमतस्थाः चक्रुरत्र गुरुवर्यविरोधम् ।
योग्यतानिगमकं हि बहिष्ठं नैव लिंगमिति शास्त्ररहस्यम् । 23

तत्र संवसति माटमहीपः प्रार्थनां समकरोत् दिदृक्षया ।
शिष्यभूपतिवरार्थनया तद्देशगे समवसच्च चित्पुरे ।। 24

तत्र केऽपि गुरुवर्यसकाशं मोदतीर्थगुरुशास्त्रजसारम् ।
श्रोतुमाययुः अहं च तदागां पूर्वपुण्यविभवो हि ममासीत् ।। 25

तत्र वत्सरगणान् प्रपाठयन् अस्मदादिशुभशिष्यसंघकान् ।
अध्युवास परमादरार्चितो माटभूपतिलकेन सद्गुरुः ।। 26

अल्पमन्नमपि संत्यजन् पुनर्लाजपिष्टभुगलं यतिवर्यः ।
वृद्धतामुपगतो हरेर्दिनद्वन्द्वमप्युपवसन् अपाठयत् ।। 27

आजगाम [1]रघुवीरसन्मुनिः चित्पुरं निजगुरोर्दिदृक्षया ।
संवसन्पुरवरे हरिगीताभाष्यमद्भुतमसौ प्रपपाठ ।। 28

---

1. Head of the Bhimana Katte Matha.





मौनिवर्यविरहातुरो मुनिस्त्वाजगाम सुवराहनामकः ।
शिष्यवर्गसहितो गुरुस्तदा त्रैशिवं पुरमगान्नृपार्थितः ।। 29

सोपि भूपतिलकः स्वसेनया छत्रचामरमुखैरुपचारैः ।
स्वानुजन्मसहितोऽभिगम्य तं स्वर्णपुष्पनिवहैरवाकिरत् ।। 30

तत्र राजवरभक्तिनिबद्धः त्रैशिवे पुरवरे समवात्सीत् ।
राजदत्तनवरत्नसुहारैः इन्दिरावरमलं समर्चयन् ।। 31

राजवर्यगुरुवर्यमेलनं द्रष्टुमत्र सुजनाः समाययुः ।
मोदतीर्थवरशास्त्रसुभक्तिः भूपतिर्न सुलभः कलौ किल ।। 32

वादिराजकृत युक्तिमल्लिकाद्युक्तयुक्तिनिवहान् गुरूदितान् ।
शृण्वतां हृदि ममौ नहि तेषां मोदसन्ततिरहो सुजनानाम् ।। 33

माटभूपतिवरोऽथ विरक्तः क्षुल्लकामनिवहात् सुधीरधीः ।
वाजियुक्तरथचामरादिकं द्रव्यजातमखिलं गुरवेऽदात् ।।
यादवेश्वर महोत्सवहेतोः स प्रगृह्य रजतासनमाप ।। 34

वराहमुनिपूजने कलिबलान्निरुद्धे गुरुः
तदा यदुवरार्चनं रहसि कारयन् तेन सः ।
हरेरपि मनोगतं समवलोक्य कर्मन्दिराट्
तृतीयमपि योगिनं निजमठेऽकरोत् बालकम् ।। 35

इति श्रीमद्विश्वप्रियविलासप्रबन्धे चतुर्थो विलासः
समाप्तः

## श्रीमद्विश्वप्रियप्रबन्धे पञ्चमो विलासः

पर्यायकाले स वयोगतोऽपि युवेव चक्रे खलु कृष्णपूजाम् ।
न वै पुनर्भक्तिभराननतानां भाराय पूजा नृहरेर्भवित्री ॥ 1

मठं नवं पापविनाशिनीतटे निर्माय वृत्तीरथ तत्र कल्पयन् ।
उत्तप्तचामीकरदिव्यमण्टपे निधाय धोटास्यमपूजयत् सुधीः ॥ 2

तत्काले रविवर्मभूपतिमणिः कोच्चीधरित्रीपतिः
आनेतुं मुनिपुङ्गवं भटजनानाज्ञापयत् धीरधीः ।
श्रुत्वा तद्भटभाषितं मुनिवरः श्रीमद्वराहाभिधन्यासि-
श्रेष्ठयुतो जगाम स नृपतिं सद्वादिराजप्रियम् ॥ 3

शुभगुणगणभारे शुद्धवैराग्यसारे
गतवति निजदेशं विश्ववन्द्ये यतीन्द्रे ।
नरपतिरथ हृष्टः सेनया राजभूत्या
परिवृत उपयातः स्वं गुरुं सन्ददर्श ॥ 4

शिबिकामधिरोप्य योगिवर्यं धृतचामीकरचामराग्र्यहस्तः ।
विबभौ यतिराजसन्निधाने नरराजो गुरुसन्निधौ यथेन्द्रः ॥ 5

योगीन्द्रं निजमन्दिरं स नरराडानीय पीठे शुभे
संवेश्याङ्घ्रियुगं सुपङ्कजनिभं प्रक्षाल्य मूर्धन्यपः ।
दध्रे सर्वजगत्पवित्रममलं सौवर्णपुष्पैरलं
संपूज्य प्रममज्ज मोदजलधौ धन्यः स पृथ्वीपतिः ॥ 6

वादिराजगुरुभक्तजनौघो योगिवर्यपददर्शनकामः ।
आययौ सुनिगमान्तविचारः संबभूव मुनिवर्यसकाशे ॥ 7





निगमपुरेश - प्राज्य - सत्सन्निधाने
नृपवरगुरुभक्त्या सन्निरुद्धो यतीन्द्रः ।
हयवदनपदाब्जं पूजयन् शिष्यसंघ-
प्रवचननिपुणोऽसावब्दमेकं न्यवात्सीत् ॥ 8

शुभगुणयुतराज्ञो जन्मनक्षत्रयोगे
बुधजनसमवायः प्राभवल्लोकहृद्यः ।
नरपतिरपि विद्वच्छेकरः श्रोतुकामः
सपदि वचनधाटीं सद्गुरोरानिनाय ॥ 9

मध्येसभं यतिवरः शुभरत्नपीठे
राजानुमोदित उपाविशदग्र्यकीर्तिः ।
यद्वत् हिमाद्रिशिखरे मृगयूथनाथः
सिंहो दिदृक्षुरखिलं वरहस्तियूथम् ॥ 10

शास्त्रस्य योनिरिति विग्रहमारचय्य
सूत्राशयं बुधवरा जगदुःस्म केचित् ।
तान् सन्निधार्य यतिराडुपचक्रमेऽथ
वक्तुं तदा बुधजनो हिमकोकिलोऽभूत् ॥ 11

स्फुटमहित - सुवर्णस्यूतमुक्ताफलश्रीः
सुजनसुकृतलभ्या राजभिः मूर्ध्नि मान्या ।
हृदि बुधजनधार्या दिव्यविश्वप्रियोक्ता
जयति सुगुणपूर्णा भारती हारतीयम् ॥ 12

प्रोद्यद्वादि - चपेटपाटनपटौ योगीन्द्रवाग्जृम्भणे
प्रोद्भूते भयवेपथु - प्रचलिताः स्विद्यन्मुखाः पण्डिताः ।

नैवोचुः किमपीह चञ्चलहृदो गन्तुं प्रवृत्ता बहिः
सर्वे नेमुरमुं निपत्य भुवि तं सम्मेनिरे वाक्पतिम् ॥ 13

स्मितयुतवचसा प्रशस्य सर्वान् यतिपतिरादरतः स्तुतः सभायाम् ।
मठमगमदसौ मध्वादिशिष्यैः हयमुखभक्तियुते किमत्र चित्रम् ॥

राजामात्यं विष्णुभक्तं द्विजाग्र्यं ज्ञात्वा तेन प्रार्थितो भाष्यमस्मै ।
टीकां विना तं च टीकार्थयुक्तं व्याचक्षाणं वीक्ष्य लोका ननन्दुः ॥

तेनार्पितः श्रीहनुमत्प्रतीकं सुसंपुटं भाविसमीरणस्य ।
संस्थापयामास तदीयभक्तिबद्धो हनूमान् किल सन्निधत्ते ॥ 16

सोदापुरे भाविसमीरणं गुरुं द्रष्टुं प्रवृत्तं गुरुसार्वभौमम् ।
वीक्ष्यैव राजा विरहासहोऽपि दत्वा धनं दिव्यविभूषणानि ।
प्रस्थापयामास कथंचिदेव सतां प्रसङ्गो हि सुदुस्त्यजः सताम् ॥ 17

सोदापुरं तत्समवाप्य योगी वराहयोगीशयुतो महात्मा ।
कृतं शुभं सद्गुरवेऽर्पयन् सुधीरुवास तीरे हरिपादजायाः ॥ 18

वराहयोगी स सुधां सुहृद्यामास्वाद्य चास्वाद्य पुनः पुनश्च ।
अतृप्त एव प्रययौ हरेः पदं सुधाशनानां सहवासहृद्यम् ॥ 19

उद्वुह्य पूजाभरमेष नित्यं हरेः प्रसादोऽयमितीक्षमाणः ।
वराहवेदेशहयास्यपूजां प्रार्थ्यार्थी सुरेन्द्रैः स चकार योगिराट् ॥ 20

मुक्तिप्रत्यूहवार्धिक्षपणकरणसत्कुम्भडिम्भं यशोदाडिम्भं
तं द्रष्टुकामः सुखसमयमुनि प्रौढसद्धाग्यरत्नम् ·
आनम्य प्रौढवादि - द्विरदनिकर - सत्कुम्भ - संभेदकारि-
श्रीमद्वादीभराजं मुनिकुलतिलकं संप्रतस्थे मुनीन्द्रः ॥ 21



राजतासनमवाप्य पत्तनं मध्वदासमुनिवर्यमण्डितम् ।
कृष्णपादजलजं विलोक्य चानन्दसारजलधौ ममज्ज सः ॥ 22

रघुप्रवीर[1]नामा मुनिराजो द्रष्टुमेव मुनिवर्यम् ।
अभ्यायौ त्वरावान् कलिकाले दुर्लभा हि देववराः ॥ 23

सुचिरं मरुदंशशास्त्रसारं पठनालेखन - पाठनाद्युपायैः ।
भुवि सज्जनपात्रके निधाय प्रतिगन्तुं हरिसन्निधिं समैच्छत् ॥ 24

शोचति रघुप्रवीरे क्रोशति भुवि सज्जने च सर्वस्मिन् ।
आयति देवविमाने वर्षति पुष्पाणि देवतानिकरे ॥ 25

अब्दे क्रोधननामके ह्युडुप-सत्क्षेत्रे सुदर्शे तिथौ
आषाढे सुवराहवाजिवदनव्यासान् समभ्यर्चयन् ।
विप्रान् ओदनदक्षिणादिभिरसौ संतर्प्य कृष्णं स्मरन्
पूषेव क्षणदानुवर्तनकृते विष्णोः पदं प्रापतत् ॥ 26

विश्वाधीश्वरनामको यतिवरो भूयोऽपि शोचन् पुनः
सद्वागीशसुसन्निधौ गुरुवरं बृन्दावनाचार्यकम् ।
सद्बृन्दावनगं विधाय बहुधा दत्वा द्विजेभ्यो धनं
स्वाद्वन्नं रघुवीरयोगिसहितः सर्वं गुरोरार्पयत् ॥ 27

देशीयः खलु कश्चन द्विजवरः स्वप्ने सुसंबोधितः
सोदां सद्गुरुमृत्तिकामुपयन् चक्रे सुवृन्दावनम् ।
स्वेन स्थापितमारुतेः स निकटे कण्णप्पनाडी-मठे
भक्तप्रीतिवशः स्वयं गुरुवरोऽद्यास्ते च वृन्दावने ॥ 28

---

1. Head of the Bhimana Katte Matha.

भक्तवत्सलतया गुरुवर्यो मृत्तिकायुतसुसंपुटसंस्थः ।
भक्तवर्यभवनेषु निषण्णोऽदृश्य एव परिरक्षति भक्तान् ॥ 29

राजतासनपुराधिकृतो यः शिक्षयामि गुरुमित्यधिक्षिपन् ।
वह्नियन्त्रमथ हूणधिक्कृतः स्वे मुखेऽकुरुत तेन ममार ॥ 30

एवमेव हरिदासवरेऽस्मिन् दुष्टसंघविहितोऽप्यपराधः ।
स्वात्मने फलति तत्र हि चित्रं मुक्तिगं सुखमतः प्रतिबद्धम् ॥ 31

एवंविधानि चरितानि गुरूत्तमस्य
दृष्टानि चाप्तगुखतोऽपि मया श्रुतानि ।
लोकेषु विश्रुततराणि मयोदितानि
लेशन कः प्रभुतरः सकलानि वक्तुम् ॥ 32

ग्रव्यन्त - पाठनचणा बुधसंघमान्याः
वाग्वैखरीः सुललिताः सुखबोधकाश्च ।
भक्तिप्रवाहमिलिता विविधाश्च पूजाः
स्मर्तुः लुठन्ति हृदये मम देशिकस्य ॥ 33

यद्वाणी विबुधाधिपैश्च शिरसा मान्या यदीयं यशः
स्फारं दिग्वनिताजनश्रवणसत्ताटंकभूषायितम् ।
यत्पादाम्बुरुहद्वयी विबुधसन्मूर्ध्नां किरीटायते
श्रीविश्वप्रियतीर्थमस्करिवरः सोऽयं सुरेन्द्रायते ॥ 34

इन्द्रत्वं तव मस्करिप्रवर भो युक्तं तु मन्यामहे
वाग्दम्भोलिविपाटित - प्रतिभट - प्रोढोक्तिभूभृद्गणात् ।
स्थित्वा विष्णुपदे धरातलजनक्षेमाय जीवातुक-
श्रीतत्त्वामृतवर्षणात् सुमनसामीशत्वतेऽपि प्रभो ॥ 35





चिदादिगुणसिन्धवे नतजनावलीबन्धवे
प्रसूनशरशंभवे हरिपदाब्जवन्दारवे ।
नमो विजितवायवे सुजनकज - सद्भानवे
सुशिष्यमणितन्तवे सुगुरवे सतां बन्धवे ॥ 36

श्रीविश्वप्रिययोगिवर्य - करुणापीयूषधारायुजा
रङ्गाचार्यपदेन संविरचितो ग्रन्थोऽयमिष्टप्रदः ।
एनं ये प्रपठन्ति भक्तिभरिताः तेषामभीष्टं ददा-
त्यस्मद्देशिकदिव्यचित्तनिलयः प्रीतः स लक्ष्मीधवः ॥ 37

इति श्रीमत्कोच्ची महीपालसत्सभाधिष्ठितेन शतकोटि-
रामाशास्त्रिणः सकाशादधीतन्यायशास्त्रेण श्रीमद्वृन्दावनाचार्य-
श्रीसोदावादिराजमठाधीश - श्रीविश्वप्रियतीर्थ प्रियशिष्येण,
चन्द्रिकाभूषणादि-ग्रन्थकर्ता विद्वद्वर श्री कोच्चीरङ्गप्पाचार्येण
संग्रथिता श्रीविश्वप्रियविलासप्रबन्धः समाप्तः ।

श्रीपूर्णत्रयीशार्पणमस्तु ॥